## दशम: अनुच्छेद:

विजयादशमी भारतीयानां पवित्रं पर्व भवति । एतत् पर्व आश्विनमासस्य शुक्लपक्षस्य दशम्यां तिथौ सम्पाद्यते । इयं तिथि: विजयसूचिका मन्यते । अस्मिन् दिवसे श्रीराम: रावणस्य निधनं कृत्वा विजयं प्राप्तवान् । अस्मिन्नेव दिवसे दुर्गा शुम्भं निशुम्भं च अमारयत् । एतत् दिनं विजयेन सम्बन्धितमस्ति । अत: एतत् दिनं विजयादशमी नाम्ना प्रसिद्धम् ।

यद्यपि अयमुत्सव: आश्विनमासस्य शुक्लपक्षस्य दशम्यां तिथौ मान्यते, तथापि उत्सवात् दशदिन-पूर्वमेव रामकथाया: रामलीलाया: संकीर्त्तनादीनां च आयोजनं भवति । जना: उत्साहेन रामलीलां पश्यन्ति । दशम्यां तिथौ रावणकुम्भकर्ण-मेघनादानां च अग्निसंयोग: क्रियते । सायंकाले रामलीलाक्षेत्रे लोकानां विपुल: समागम: भवति । तस्मिन् समये रामस्य लक्ष्मणस्य हनुमत: च वेशेन कलाकारा: तत्र आगच्छन्ति । हनुमान् च दशहरास्थानमागच्छति । हनुमता कृत्रिमा लङ्का दह्यते । उपस्थिता: जना: श्रीरामस्य जयध्वनिं कुर्वन्ति । अयमुत्सव: अधर्मस्य उपरि धर्मस्य, असत्यस्य उपरि सत्यस्य, दुर्जनताया: उपरि सज्जनताया: विजयस्य प्रतीकमस्ति । वस्तुत: एष: उत्सव: परमपावन: अस्ति ।

### प्रश्ना:

1. **एकेन वाक्येन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

   (क) विजयादशमी उत्सव: कदा सम्पाद्यते ?

   (ख) विजयादशमी दिवसे दुर्गा कान् अमारयत् ?

   (ग) केन प्रकारेण विजयादशमी उत्सव: विजयस्य प्रतीकमस्ति ?

2. **एकेन पदेन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

   (क) विजयादशमी दिवसे श्रीराम: कस्य निधनं कृतवान् ?

   (ख) भारतीयानां पवित्रं पर्व किम् ?

   (ग) सायंकाले केषां समागम: भवति ?

   (घ) उपस्थिता: जना: कस्य जयध्वनिं कुर्वन्ति ?

●●●